International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 169-170
© 2026 IJMH
www.themultijournal.com

Received: 23-07-2026
Accepted: 20-08-2026
Publish : 21-08-2026

डॉ. मनुदेवः
M.A, M.Phil, Ph.D,
पी.जी.टी. संस्कृत,
राजकीय कन्या वरिष्ठ माध्यमिक विद्यालय, किलोई, जिला – रोहतक, हरियाणा

Correspondence:
डॉ. मनुदेवः
M.A, M.Phil, Ph.D,
पी.जी.टी. संस्कृत,
राजकीय कन्या वरिष्ठ माध्यमिक विद्यालय, किलोई, जिला – रोहतक, हरियाणा

वैशेषिकदर्शने मनस्तत्त्व भक्तियोगो ज्ञानयोगश्च दार्शनिकदृष्टया विमर्शः

डॉ. मनुदेवः

पदार्थशास्त्रेषु वैशेषिकदर्शनस्याग्रिमस्थानम्। वैशेषिकदर्शनानुसारं द्रव्यादिषट्पदार्थाः सन्ति। यथोक्तं महर्षिकणादेन वैशेषिकसूत्रे 'धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्य-विशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्।' एतेषु सम्प्रदायेषु द्रव्यपदार्थः द्रव्यत्वम्। तच्च द्रव्याणि नव। यथोक्तमस्ति वैशेषिकसूत्रे 'पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि।'

महर्षिकणादेन द्रव्येषु मनसो निर्देशः कृतः। पृथिव्यादिषु अन्तिमद्रव्यं भवति मनः। महर्षिः पतञ्जलि इव वैशेषिकाः अपि मनसो नित्यत्वमङ्गीकुर्वन्ति। परन्तु मनसः परमाणुपरिमाणवत्त्वमिति एते वदन्ति, विभुपरिमाणवद्वन् द्रव्येषु मनसो पाटञ्जलेभ्यो भिद्यते। वैशेषिकाः मनसो वेत्त्वं, क्रियात्त्वं, अनेकत्वञ्चाङ्गीकुर्वन्ति इन्द्रियत्वमप्यङ्गीकुर्वन्ति। मनः आभ्यन्तरं मनसः आत्मानां संयुक्तं मनः इन्द्रियैस्सहयुज्य प्रत्यक्षदीनि ज्ञानान्युत्पादयति। ज्ञानान्यशः आत्मा, तस्य साधनं मनः इति एतेषामभिप्रायः। विषयैन्द्रिय संयोगे सत्यपि मनसः अभावे आत्मनि ज्ञानं नोत्पद्यते। अतः वैशेषिकाः अनुमानप्रमाणेन मनः साधयन्ति। एतेषाम्मते मनः अतीन्द्रियं भवति। सुखदुःखादीनि मनः साक्षात्कारयति। निद्रावस्थायां स्वापसमये मनो निश्चलं भवति। आत्मेव मनोऽपि शरीरस्यान्तरेव व्यापारं करोति। मनः अणुपरिमाणं भवति। अत्र अणुनापि पृथिव्यादीनां यादृशोऽणुः तादृशो ना। ततो विशिष्टोऽयमणुः।

वैशेषिकाणां मतानुसारं नित्यद्रव्येषु निर्दिष्टत्वात् मनसः उत्पत्तिर्नास्ति। प्रलये द्रव्यं सर्वमपि विनश्यति। अत एव पृथिव्यादीनि द्रव्याणि निर्दिष्टानि नित्यत्वभेदेन द्विधा भवन्ति। नित्यत्वं तु पृथिव्यादिपरमाणुनामेव। तथा मनोऽपि अणुः भवतीति तस्य नित्यत्वमङ्गीकृतम्। अतः मनसः उत्पत्तिर्नास्तीति वैशेषिकैः प्रतिपाद्यतिति।

पृथिव्यादिपरमाणुभ्यो नान्यत् द्रव्यमुत्पादयितुं मनः विशेषम् अस्ति। पृथिव्यादिपरमाणवः घटादिद्रव्योत्पादने समर्थाः, परन्तु अणुपरिमाणं मनः स्पष्टमिदं द्रव्यं भवतीति तत् द्रव्यान्तरोत्पादने समर्थं नास्ति। सुखदुःखाद्युपलादकिका क्रिया मनसो वती इति तस्य मूल्यम्। साधारणबाह्यकरणवशात् मनसः अदृष्टम्। प्रत्यक्षज्ञानोत्पादने आत्मनः कारणं भवतीति मनसः पार्थक्यम्। एकसमक्ष्या, अणुपरिमाण, आत्मोद्देश्यसंयोगादयः गुणाः मनसो वर्त्तन्ते इति तस्य द्रव्यत्वम्। प्रत्यक्षस्य अदृष्टस्य च स्वीकारवशात् शीघ्रमगामित्वज्ञायेन मनसो सिद्धयति। यथोक्तमस्ति प्रशस्तपादभाष्ये-

"अस्पर्शवत्त्वे सति द्रव्यत्वात्मकत्वम्। क्रियावत्त्वान्मूर्त्तत्वम्। साधारणेन्द्रियवशात् असङ्ग्रहः अतत्त्वम्। कारणभावात् परमर्षि। गुणवत्त्वात् द्रव्यत्वम्। प्रयत्नवदात्मसंयोगात् क्रियावत्त्वान्मनसो वर्त्तते।।"

मनसः प्रथमं कर्म अदृष्टेन जायते। तदुक्तं कणादेन- "अद्रैरूक्तवत्तस्य कार्यसिद्धिरमनसाम्शा मनसश्चाद्यं कर्मेत्यदृष्टकारितम्" इति। मनसोऽणुत्वात् परिमाणस्य नास्तीति वैशेषिकाः मन्यन्ते।

मनसो धर्माः-

पृथिव्यादीनां नवानां द्रव्याणां साधर्म्यं वैधर्म्यञ्च निरूपणानन्तरं प्रशस्तपादेन स्वभाष्ये मनसो धर्माणां विषये पर्यालोचितम्-मनसि द्रव्यत्वानिमित्तरूपो धर्मः विद्यते। अयं धर्मः अन्येष्वपि पृथिव्यादिषु वर्त्तमानस्सन् गुणकर्मोद्देश्यः एतेषां भेदं कलयति।

त्वस्मिन् समवेतानां सजातीयानां कार्यकारणानुपादकरूपो धर्मः मनसोऽस्ति।

कारणे कार्येण वा अविनाभावरूपो धर्मः मनस्यस्ति। पृथिव्यादीनां भेदकः विशेषेभ्यो धर्मोऽपि मनसो भवति। अयं विशेषरूपो धर्मः नित्यद्रव्याणामेव भवति। अतः पृथिव्यप्तेजोवायुरमाणाणुषु, आकाशकालदिगात्ममनस्सु चायं धर्मोऽस्ति। अयं धर्मः द्रव्याणमितरद्रव्यवृत्तिवारणाय कल्पयति। कस्याप्याश्रितस्तद्रूपो धर्मः, नित्यद्रव्यो धर्मश्च मनसो भवति। एवं क्रियावत्त्वं, मूर्त्तत्वं, परत्वत्वं, अपरत्वत्वं, वेगवत्त्वं च मनसि भवन्ति। मनसोऽनेकत्वमस्ति। अतस्तत्तदात्मसंयोगेषु मनस्सु आनुगतस्य

मनस्त्वजातिसमवायसम्बन्धेन मनसि वर्त्तते। एवमेवैभिर्विशेषैर्हि मनः इतरद्रव्येभ्यो वैलक्षण्यमभिव्यञ्जयतीति। यथोक्तं प्रशस्तपादेन प्रशस्तपादभाष्ये साधर्म्यवैधर्म्यप्रकरणे पृथिव्यादीनां नवानामपि द्रव्याणामेवम्-

स्वात्मात्मकत्वं कार्यकारणविरोधीत्वम्-न्यविशेषावत्वम्।

अनाश्रितत्वनित्यत्वप्रत्ययविपर्य्ययैवैरुः।

पृथिव्युदकज्वलनपवनानामात्मनसां अनेकत्वपरजाति-मत्त्वे। स्थिति-लक्षणज्योतिरनिलमनसां क्रियावत्त्वमूर्त्तत्वपरत्वापरत्ववेगवत्त्वानि।"

मनसः इन्द्रियत्वम्:-

वैशेषिकैः नवद्रव्येषु मनः परिगण्यते। तस्य द्रव्यत्वं तथा इन्द्रियत्वमङ्गीकुर्वन्ति। शास्त्रे षडिन्द्रियाणि विद्यन्ते। यथा- त्वक्-चक्षु-जिह्वा-घ्राण-श्रोत्र-मनांसि षडिन्द्रियाणीति वैशेषिकाः प्रतिपादयन्ति। यथोक्तं प्रशस्तपादभाष्ये प्रशस्तपादभाष्ये प्रत्यक्षप्रकरणे-इन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि षट्। एतेषु ल्लाँगोदयोपि पञ्च बाह्येन्द्रियाणि, मनस्त्वन्विन्द्रियम्। आत्मवयसतः करणत्वाव्यवहारः। मनः तन्मादीनि इन्द्रियेन धर्मे साधर्म्याणिच्छन्ति, द्रव्यत्वरूपजात्या बाह्येन्द्रियेभ्यो विलक्षणतां प्राप्नोति। सर्वेष्विन्द्रियेषु मन एव प्रधानम्। चक्षुरादीन्द्रियाणां मनसा ज्ञानोपसम्यमभावात् तस्य प्राधान्यम्। मनस्सन्निध्याभावे चक्षुदिभिर्दीप्तद्रव्ये रूपादिज्ञानं न शक्यते। अतः मनसाभावेन बाह्येन्द्रियाणि पृथिव्यादि पञ्चभूत-सम्बन्धीनि भवन्तीति तेषां भौतिकत्वम्। मनस्त्वभौतिकं भवति। यथोक्तमस्ति वैशेषिकदर्शनसङ्ग्रहे- मनसः गुणसिद्धिसमन्वयविधिं पूर्वक द्रव्यम्। एवं वैशेषिकाः मनसः इन्द्रियत्वम्, इतरइन्द्रियेभ्यस्तस्य प्राधान्यञ्च साधयन्ति।

मनसः प्रत्यक्षकरणत्वम्:-

आत्म-मन-बाह्येन्द्रियाणि-विषयाः एतेषां चतुर्णां संयोगे सतीन्द्रिय प्रत्यक्षं आनुभूयते। प्रथमतः आत्मा मनसा संयुज्यते। मनः बाह्येन्द्रियेण। इन्द्रियन्तु विषयैस्सह संयुज्यते। तदनन्तरं द्रव्यविषयकं ज्ञानमस्माभि जायते। इति ज्ञानं द्विविधंमुल्लेख्यते। प्रत्यक्षं तावत् द्विविधम्, सविकल्पक निर्विकल्पकञ्चेति। निर्विकल्पके प्रत्यक्षे पदार्थानां सामान्यरूपं ज्ञानं जायते। सविकल्पके प्रत्यक्षे तु तदाधारितं गुणकर्मजातिविशेषणानां ज्ञानं जायते।

रूपादीनां प्रत्यक्षे तत्तद्विषयैः बाह्येन्द्रियैस्साकमस्मन्मनसस्संयोगो जायते। तथाच-रास-प्रदायामात्ममनसोश्चक्षुरिन्द्रियसंयोगे जायते। सम्प्रधार्य आत्ममनस्संयुक्तेन रसनेन्द्रियोत्पद्यते। गन्ध प्रत्ययमनसोः श्रोत्रेन्द्रियेण शब्दसाक्षात्कारो जायते। संख्या, परिमाण, पृथक्त्व, संयोग, विभाग, परत्व, अपरत्व, स्नेह, द्रवत्व, वेग कर्माणां प्रत्यक्षं आत्ममनस्संयुक्ते बहुद्रव्यसमन्वितेन्द्रियसंयोगाद्यो जायते। यथोक्तं प्रशस्तपादभाष्ये प्रशस्तपादभाष्ये प्रत्यक्षप्रकरणे- "रूपादीनामुप-लब्धौ तत्तदिन्द्रियसमन्वायेन स्वगतविशेषात् स्वाश्रयसमवेता-दर्थान्निर्निमित्तमुपजायते। शब्दस्य श्रोत्रसम्बन्धाच्छ्रोत्रसमवेतेन तेनैवोपलब्धिः। संख्या परिमाणापृथक्त्व संयोगविभागपरत्वापर-त्वस्नेह द्रवत्ववेगकर्मणाम्। प्रत्यक्षद्रव्यसमवायात्तदाश्रयाणां ग्रहणम्। बुद्ध्यसुखदुःखेच्छाद्वेष प्रयत्नानां द्वयोरतत्वात्ममनसस्संयोगा-दुपलब्धिः।

बुद्धिसुखदुःखेच्छाप्रयत्नानां ज्ञानं केवलमात्ममनसोस्संयोगेनोत्पद्यते। तत्र बाह्येन्द्रिय-संयोगोद्भव नास्ति। एतच्च सर्वं सामान्याज्ज्ञानानां प्रत्यक्षविषयकमुपन्त्यस्तम्।"

योगिनान्तु प्रत्यक्षमन्यद्वदेव भवति। योगिनं द्विविधाः। विविष्टा नियताश्चेति। तत्र विविशानां योगिनां युक्ता इति व्यवहारः। एतेषां योगाभ्यासमुद्भवैः मनसा स्वात्माकाल-दिगाकाशाणुपरमाणुमनस्सु, तत्रैव स्वावयवसमवेते वर्त्तमानोषु गुणकर्मसामान्यविशेषेषु समवाये च सत्यं स्वरूपदर्शनमुत्पद्यते। विमुक्तानां युक्तानां पुनः योगाभजनेहसामर्थ्यात् आत्ममनसोर्विप्रकृष्टे रपि सार्थे स्वकल्पने-नोत्पद्यते। विमुक्तानां च प्रत्यक्षमनुग्रदधात इति प्रशस्तपादेनोक्तम्। यथोक्तं प्रशस्तपादभाष्ये प्रत्यक्षप्रकरणे- "अस्मद्विशिष्टानां तु योगिनां युक्तानां योगधर्मानुगृहीतेन मनसाऽऽत्माकाशादिक, कालदिगणुपर-माणुमनस्सु तत्समवेतेषु च गुणकर्मसामान्यविशेषेषु समवाये चार्थितत्वं स्वरूपदर्शनमुत्पद्यते। वियुक्तानां पुनश्चतुष्टयसन्निकर्षाद्योग धर्मानुग्रहासामर्थ्यात्सूक्ष्मव्यवहितविप्रकृष्टेषु प्रत्यक्षमुपपद्यते।"

एवं नानाविधतया विभिन्न प्रपाठेषु सर्वैषामपि मनसोऽप्येवा अस्ति इति तस्य प्रत्यक्षकरणत्वं सिद्धम्। अतः

सन्दर्भाः-

१.प्रशस्तपादभाष्यम्- प्रशस्तपादः- चौखम्बा संस्कृतप्रतिष्ठान दिल्ली-२०११

२.वैशेषिकदर्शनम्- डॉ.पंकजकुमार शर्मा- हंसाप्रकाशनजयपुर-२०१२

३.वैशेषिकरसायनम्-कणाद- चौखम्बा संस्कृतप्रतिष्ठान दिल्ली-२००७

४.सर्वदर्शनसङ्ग्रहः- माधवाचार्यः- चौखम्बा विद्याभवन वाराणसी-२००८

५.धर्मेषु तत्त्वसङ्ग्रहम् नीलकमलदाशशर्माः- साम्बादि प्रकाशन पुरी-१९११

६.संस्कृतवाङ्मयपुष्पम्- डॉ कृष्णगोपाल जाजिङ्-हंसाप्रकाशनजयपुर-२०१३

७.भारतीयदर्शनम्- शशिभूषणमिश्र, विद्यानिधिप्रकाशन दिल्ली-१९९२

८.पदार्थसङ्ग्रहशास्त्रं- प्रो. एन.गुप्त, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली-२०१२

९. वै.सू. ११/२

१०. वै.सू. ९/१५

११. प्रशस्तपादभाष्य मनः प्रकरणम् (पृ.सं.-५८)

१२. वैशेषिकदर्शनम् ५-१२-१३(पृ.सं.- १७३)

१३. प्रशस्तपादभाष्यम्-साधर्म्यप्रकरणम् (पृ.सं.- १०)

१४. प्रशस्तपादभाष्यम् प्रत्यक्षप्रकरणम्(पृ.सं. १५३-१५४)

१५. वैशेषिकरसायनम्-८-२-६ (पृ.सं.२६२)

१६. प्रशस्तपादभाष्यम्-प्रत्यक्षप्रकरणम् (पृ.सं.-१५७)

१७. प्रशस्तपादभाष्यम्-प्रत्यक्षप्रकरणम् (पृ.सं.-१५९)